संशोधनमण्डलग्रन्थमालायाः प्रथमं पुष्पम्

लक्ष्मीपतिशर्मणा विरचितस्य

रत्नदीपस्य

मूलभागः



संशोधनमण्डलग्रन्थमालायाः प्रथमं पुष्पम्

पाँडेकुलोत्पन्नेन दैवज्ञशिरोमणिना

लक्ष्मीपतिशर्मणा विरचितस्य

रत्नदीपस्य

मूलभागः

नयराजपन्तेन रामजीतेवारिणः

सहायतामवलम्व्य सम्पादितः

लक्ष्मीपतेरेकविंशत्यधिकशतद्वय (२२१) मिते जन्मोत्सवदिने

बाणत्रिपूर्णद्वि (२०३५) मिते वैक्रमाब्दे

सौरस्य वैशाखस्य सप्तविंशे (२७) दिवसे बुधवासरे

संशोधनमण्डलेन प्रकाशितः

  

प्रथमे संस्करणे

५०० पुस्तकानि

प्रकाशकम्–
संशोधनमण्डलम्
१०/३७४ वटुसवलबहाले
काष्ठमण्डपे, नेपाले

मूल्यम्– २/५० (सार्धरुप्यकद्वयम्)

मुद्रकः–
लुषमुद्रणालयः
पुलचोके
ललितपुरे, नेपाले

समर्पणम्

स्वीयपूर्वजकृतीः सुदुर्लभा
रक्षितुं सुमतिदा धृतव्रत ।
मत्प्रसूजनक सर्वदैव मे
मानसे भुवननाथ राजसे ॥१॥

स्वैः पूर्वैः पुरुषैः स्वयं च महताऽऽयासेन ये सञ्चिता-
स्ते ग्रन्था जरसा युतेन भवता न्यस्ता मदीये करे ।
स्वर्यानाद् भवतः समा व्यतिगता वेदत्रि ३४ भिः संमिता
व्यक्ता त्वत्प्रपितामहस्य सुकृतिस्त्वत्प्रीतये स्तादियम् ॥२॥

न्यस्तस्त्वया यो मयि रत्नदीपः
प्रकाशभाजं विरचय्य यत्नात् ।
तुभ्यं तमेव प्रतिदाय चित्ते
धत्ते प्रमोदं नयराज एषः ॥३॥

प्रस्तावना

भिन्नं बहुषु खण्डेषु नेपालाभिधमण्डलम् ।
एकीकुर्वति सन्नीत्या पृथ्वीनारायणे नृपे ।।१।।
गोर्खाभिधे जनपदे ग्रामे गाईखुराभिधे ।
पञ्चेन्दुगजपृथ्वी १८१५ र्भिमिते वैक्रमवत्सरे ।।२।।
पाँडेकुलसमुद्भूतो ज्योतिर्विद्यासमन्वितः ।
कृष्णानन्दाभिधो विप्रो लेभे लक्ष्मीपतिं सुतम् ।।३।।
सिंहासने शोभमाने बाले रणबहादुरे ।
राजकार्यं विधत्ते स्म तत्पितृव्यो बहादुरः ।।४।।
पित्रा प्रदर्शितां नीतिमनुगच्छन् बहादुरः ।
कालेनाऽल्पीयसा चक्रे नेपालं गौरवान्वितम् ।।५।।
ज्योतिर्विद्याविलसितं दूतकार्यविचक्षणम् ।
लक्ष्मीपतिं सहचरं निजं चक्रे बहादुरः ।।६।।
राजकार्ये प्रविष्टोऽपि विद्याव्यसनितां गतः ।
लक्ष्मीपतिर्निजां विद्यां क्रमशोऽवर्द्धयत् स्वयम्।।७।।
दैवज्ञत्वेन सन्तुष्टो भूपो रणबहादुरः ।
लक्ष्मीपतिं संविदधे दैवज्ञानां शिरोमणिम् ।।८।।
नेपालमण्डलं नीत्या प्रशासति बहादुरे ।
यशस्वितां धनिकतां प्राप लक्ष्मीपतिः शनैः ।।९।।

कारागृहं सुरगृहं क्रमात् प्राप्ते बहादुरे।
लक्ष्मीपतेरुपघ्नोऽभूद् नैव कोऽपि दृढः क्वचित् ॥१०॥
स्वैरं चरति दुर्दैवाद् भूपे रणबहादुरे।
लक्ष्मीपतिः शरण्यं स्वं मेने विश्वेश्वरं शिवम् ॥११॥
कनीयसी प्रिया तस्य तदाऽभूद् गृहरक्षिका।
लक्ष्मीपतिर्गृहं प्रापत् कोशेन परिवर्जितम् ॥१२॥
राजकार्याद् विच्युतोऽपि दैवज्ञत्वबलेन सः।
राजगेहं गच्छति स्म भीमसेने प्रशासति ॥१३॥
लक्ष्मीपतिः षष्टि ६०वर्षः शराद्रिधृति१८७५भिर्मिते।
वैक्रमाब्दे कान्तिपुरीं त्यक्त्वा काशीं समाश्रयत् ॥१४॥
गजाष्टवसुपृथ्वी१८८८भिर्मिते वैक्रमवत्सरे।
लक्ष्मीपतिस्त्र्यद्रि७३वर्षो जहौ काश्यां निजां तनुम् ॥१५॥
ग्रन्थान् प्रभूतान् प्रचुरैर्ज्योतिर्विद्भिर्विनिर्मितान्।
लक्ष्मीपतिः प्रयत्नेन सङ्गृह्णाति स्म सर्वदा ॥१६॥
व्योमस्थघटनानां च गणितेन समन्वये।
लक्ष्मीपतेरुत्सुकत्वं दृश्यते तन्निबन्धने ॥१७॥
खेटवेधोपयुक्तानां यन्त्राणां रचनाविधौ।
लक्ष्मीपतेरुत्सुकत्वं शीर्णैर्यन्त्रैः प्रदर्श्यते ॥१८॥
ग्रन्थास्तदीया अधुना लभ्यमाना इतस्ततः।
लक्ष्मीपतिं व्यञ्जयन्ति ग्रन्थनिर्माणतत्परम् ॥१९॥
रत्नदीपाभिधो ग्रन्थो लक्ष्मीपतिविनिर्मितः।
सोदाहृतिः सोपपत्ती राजते तस्य सङ्ग्रहे ॥२०॥

अधुना रत्नदीपस्य मूलभागो हि केवलः ।
परिश्रमेण संशोध्य यथामति प्रकाश्यते ।।२१।।
लक्ष्मीपतेर्ज्यौतिषे तु पाण्डित्यं भूरि वीक्ष्यते ।
क्वचित् क्वचिद् दुर्बलत्वं व्याकृतौ तस्य दृश्यते ।।२२।।
सन्ध्यादीनां विपर्यासः शोधितोऽत्र यथामति ।
पदानां परिवर्ते तु टिप्पण्यत्र निवेशिता ।।२३ ।।
रत्नदीपस्य कतिचिच् श्लोका व्याख्यासमन्विताः ।
पूर्णिमायां विराजन्ते रामजीसंप्रकाशिताः ।।२४।।
दुर्बोधतामपाकर्तुं रत्नदीपस्य यत्नतः ।
मया कृतं नवं रूपं वर्तते प्रतिसंस्कृतम् ।।२५।।
उपपत्त्या लक्ष्मीपतेर्नूत्नया च विभूषितः ।
सोदाहृतो रत्नदीपः प्रतिसंस्कारसंयुतः ।।२६।।
भविष्यद्भिः कतिपयैर्दिवसैर्निर्गतो बहिः ।
गणितज्ञान् प्रीतचित्तान् विधेयादिति कामये ।।२७।।
सम्पादनविधावस्मिन् रामजी सखितां व्यधात् ।
महेशस्य दिनेशस्य सखिताऽभूत् तनीयसी ।।२८।।
नेपालमूलनगरे वसन् कान्तिपुराभिधे ।
चतुःषष्टि६४समीनोऽहं नयराजाभिधो द्विजः ।।२९।।
पन्तोपाख्यो रत्नदीपं निदधे विदुषां पुरः।
चतुस्त्रिपूर्णचक्षु२०३४र्भिर्मिते वैक्रमवत्सरे ।।३०।।

नेपालमूलनगरात् काष्ठमण्डपात् संस्कृतच्छात्रसङ्घेन प्रकाशितस्य जयतु संस्कृतमिति पत्रस्य षष्ठेऽङ्के ६-१४ पृष्ठेषु लक्ष्मीपतेः संक्षिप्तं संस्कृतभाषानिबद्धं चरित्रं प्रकाशितं वर्तते ।

काष्ठमण्डपात् संशोधन-मण्डलेन प्रकाशिताया इतिहासप्रधानायाः पूर्णिमायाः पत्रिकायाः

७	पूर्णाङ्के	६१ - ७४	पृष्ठेषु
८	,,	३४ - ४१	,,
९	,,	३८ - ४७	,,
१०	,,	४६ - ५३	,,
११	,,	३७ - ४८	,,
१२	,,	६० - ७०	,,
१३	,,	४२ - ५०	,,
१४	,,	१५६ - १६९	,,
१६	,,	३९४ - ४१४	,,
१८	,,	१४२ - १५०	,,
२९	,,	५६ - ७१	,,

लक्ष्मीपतेश्चरित्रं प्रकाशितं वर्तते ।

पूर्णिमायाः ११	पूर्णाङ्के	४९ – ६२	पृष्ठेषु
१२	,,	७१ – ७७	,,
१३	,,	५० – ५५	,,
१४	,,	१७७ – १८७	,,
१६	,,	४१९ – ४३१	,,
१७	,,	५९ – ७१	,,
१८	,,	१६७ – १७७	,,
१९	,,	२५७ – २७०	,,
२०	,,	३४१ – ३४५	,,
२१	,,	७६ – ८७	,,
२२	,,	१४३ – १४५	,,
२३	,,	२०९ – २१७	,,
२४	,,	२८८ – २९९	,,

रत्नदीपस्य प्रथमाध्यायः सार्थः सोदाहरणः प्रकाशितो वर्तते।

२५ पूर्णाङ्के २३ – ३९ पृष्ठेषु

प्रतिसंस्कृतस्य रत्नदीपस्य सार्थः प्रथमाध्यायः प्रकाशितो वर्तते।

३५ पूर्णाङ्के १६९ – १७७ पृष्ठेषु

मूलस्य रत्नदीपस्य द्वितीयाध्यायस्य प्रथमस्य श्लोकस्य कश्चनांशस्तस्य प्रतिसंस्कृतं रूपं तस्य सोदाहरणोऽर्थश्च प्रकाशितं वर्तते।

रत्नदीपस्थानां प्रकरणानां समुद्देशः

पञ्चाङ्गाधिकारे

पञ्चताराग्रहाधिकारे

त्रिप्रश्नाधिकारे

चन्द्रग्रहणाधिकारे

सूर्यग्रहणाधिकारे

छेद्यकाधिकारे

वर्षफलाधिकारे

अथ रत्नदीपे ग्रहध्रुवाधिकारः ।।

पञ्चदेवतानमस्काररूपं मङ्गलमाह ।

श्रीहेरम्बं माधवं वामदेवं
नत्वा देवीं भास्करं शिष्यतुष्टचै ।
ब्रूते कृष्णानन्दजो रत्नदीपं
गोभूमेघो१७१९ने शके सौरसूत्रात् ।।१।।

श्रीमद्द्रव्यशाहस्य शकानयनपूर्वकं ग्रन्थाब्दानयनमाह ।

शाकः शशीभेन्द्र१४८१विहीनितः स्याद्
गोरक्षशैलाधिपतेः शकाब्दः ।
श्रीद्रव्यसाहस्य स एव नागा-
नलाक्षि२३८हीनोऽत्र मया कृतोऽब्दः ।।२।।

मेषार्कस्फुटकालसाधनमाह ।

अब्दौघः स्वपदा$\frac{1}{8}$न्वितः शशियम२१-
घ्नाब्दः स्वखेषुत्रिभू १३५०-
भागाढ्यो यमवाजि७२र्भिर्विरहितो-
ऽभ्राभ्राब्धिपक्षो २४०० द्धृतः ।
लब्धेनाऽथ युतः कृतान्त२सहितः
शैलै ७र्विहृच् छेषकः
सूर्याजक्रमजो दिनादिक इहो-
ष्णांशोर्भवेद् वासरः ।।३।।

देशान्तरसाधनमाह ।

अङ्घ्रच् ूँ नरेखापरपूर्वयोजनैः
पलैर्वियुग् युक् सचरः स्वदेशजः ।

अर्कादीनामेकदिनजमध्यमगतीराह ।

रवेर्नवाक्षा ५९ भुजगाः ८ कलानिधेः
खनन्दशैलाः ७९० शरवह्नयो ३५ गतिः ॥४॥
चन्द्रोच्चजा तर्क६कलाः कुवेदाः ४१
पातस्य रामाः ३ कुभुवो ११ विलोमा ।
भूराम३१घटचोऽङ्ग्यमाः २६ कुजस्य
जीवस्य पञ्चा५र्कसुतस्य पक्षौ २ ॥५॥
ज्ञोच्चस्य पञ्चाब्धियमा २४५ द्विरामाः ३२
शुक्रोच्चजा षण्णवति९६र्भुजङ्गाः ८ ।

सङ्क्रान्तिकालिकानां ग्रहाणामुदयकालिकत्वसाधनमाह ।

अजार्कघटचः स्वजवैर्विनिघ्ना
बीजानि षष्टचा६०प्तकलामुखानि ॥६॥
बीजोनितास्ते गणितागताः स्युः
खेटा रवेरौदयिका ध्रुवांशाः ।

सूर्यस्य मेषार्ककालिकं स्थिरं ध्रुवमाह ।

शैलेषुरामाः ३५७ कुशरा ५१ गजाक्ष ५८ –
मिता ध्रुवांशास्तरणेः सदोक्ताः ॥७॥

चन्द्रध्रुवसाधनमाह ।

द्वित्रीन्दु१३२निघ्नोऽब्दचयः स्वशून्या-
चलेन्दु१७०भागेन गजेषुरूपैः १५८ ।
समन्वितोंऽशादिशशी स्वपङ्क्ति१० -
भागान्विताब्दार्क १२ लवैः कलाढ्यः ॥८॥

चन्द्रोच्चध्रुवसाधनमाह ।

रूपाब्धि४१निघ्नोऽब्दगणः स्वनन्दा-
र्कां १२९शोनितोऽङ्गाद्रियमैः२७६ खपक्षैः २०।
युतो विधूच्चं सनिजाभ्रनेत्रां२० -
शाब्दाङ्गचन्द्रां१६शकलायुतः स्यात् ॥९॥

चन्द्रपातध्रुवसाधनमाह ।

नखा२०हताब्दो निजभूगुणां३१शै-
र्हीनः समार्कां१२शकलिप्तिकोनः ।
शराङ्ग६५हीनो विपरीतगत्या
चक्राद् ३६० विशुद्धो भवतीन्दुपातः ॥१०॥

भौमध्रुवसाधनमाह ।

अब्दोऽश्विनन्देन्दु१९२हतः स्वशून्य-
दन्तां३२०शहीनो नववेद४९युक्तः ।
भूयोऽब्दपञ्चाद्रिगुणां३७५शयुक्तो
भौमध्रुवः स्याद्

बुधशीघ्रोच्चध्रुवसाधनमाह ।

अथ बोधनोच्चम् ।।११।।

बाणेषु५५निघ्नः स्वखषड्यमां२६०शै-

रर्कै१२र्जिनैः२४क्ववग्नि३१लवैर्विहीनः ।

बृहस्पतिध्रुवसाधनमाह ।

जीवोंऽश३०निघ्नोऽद्रिगजां८७शयुक्तः

साब्दद्विभूपां१६२श इलाक्षि२१ हीनः ।।१२।।

शुक्रशीघ्रोच्चध्रुवसाधनमाह ।

तत्त्वाश्वि२२५घ्नः स्वाभ्रवेदेश११४०भागै-

र्युक्तः सार्द्धाष्टाक्षि२८।३०हीनः सितोच्चम् ।

शनैश्चरध्रुवसाधनमाह ।

अर्क१२घ्नोऽङ्गाक्षां५६शनन्दर्तु६९युक्तो

वर्षाभ्राभ्रेन्द्रां१४००शयुक् सूर्यसूनुः ।।१३।।

इति दैवज्ञशिरोमणिना लक्ष्मीपतिशर्मणा विरचिते

सिद्धान्तसारे रत्नदीपे ग्रहध्रुवाधिकारः

अथ रत्नदीपे पञ्चाङ्गाधिकारः ।।

अयनांशसाधनमाह ।

गताब्दयुक्ता गजनन्दसूर्याः१२९८

स्वदिग्१०लवोना विहृताः खतर्कैः ६० ।

स्युस्तेऽयनांशाः

विषुवच्छायासाधनमाह ।

पलभा भवेत् सा-
ऽयनाजसङ्क्रान्तिदिनार्द्धजा भा ।।१।।

चरखण्डसाधनमाह ।

पलभा खगुणै३०र्जिनैः२४ खरूपै १० -
र्गुणिता राम३हृता चरार्द्धकानि ।

चरसाधनमाह ।

अयनांशयुगर्कदोर्भजानां
युतिरग्यूघ्नलवांश३०युक् चरार्द्धम् ।।२।।

अहर्गणसाधनमाह ।

अजादिगार्कवासराद् गतो भवेदहर्गणो

प्रकारान्तरेणाऽहर्गणसाधनमाह ।

ऽथवा मधोः सितात् तिथेर्गणः समादितिथ्ययुक् ।
अधश्चतूरसै६४र्हृताऽवमैर्विहीनितो भवे–
दहर्गणो

सूर्यस्य मन्दोच्चमाह ।

रवेर्गजाद्रयो ७८ शका मृदूच्चजाः ।।३।।

अहर्गणात् सूर्यसाधनमाह ।

खाद्रच ७०शोनोऽहर्गणोऽर्को ध्रुवाढ्यो
ऽहर्वृन्दाभ्रेष्विन्दु१५०भागैः कलोनः ।

मन्दकेन्द्रस्य साधनं मन्दफलस्य धनर्णत्वं चाऽह ।

द्विष्ठः शुद्धो मार्दवोच्चात् स्वमस्वं
मान्दं केन्द्रं भार्द्ध १८० भागाल्पपुष्टे ।।४।।

भुजसाधनमाह ।

विभार्द्ध १८० भागं खनवा ९० धिकं चेत्
तच्छोधितं दोः कथितं किलाऽर्यैः ।

मन्दफलसाधनमाह ।

दोर्दिग् १० लवात् स्युः खलु मान्दखण्डा
भोग्यान्तरघ्नांशदशां १० शयुक्ताः ।।५।।

सूर्यस्य मान्दाङ्कानाह ।

रवेस्त्रिपक्षा २३ विषयाब्धयः ४५ षट्-
तर्काः ६६ शराष्टौ ८५ कुदिशो १०१ ब्धिरुद्राः ११४।
त्र्यर्का १२३ गजार्काः १२८ कुगुणेन्दवः १३१ स्युः
षष्ट्यु ६० द्धृतास्ते खलु मन्दभागाः ।।६।।

स्पष्टसूर्यसाधनमाह ।

तत्संस्कृतोऽर्कोऽथ पलैश्चराद्धैं-
र्हीनान्वितः स्पष्टतरः किल स्यात् ।

अहर्गणाच् चन्द्रसाधनमाह ।

अह्नां गणो विश्व १३ गुणः स्ववेदा-
द्रय ७४ शान्वितोऽह्नां शरलोचनां २५ शैः ।।७।।

कलायुतो

चन्द्रे भुजफलसंस्कारं चरफलसंस्कारं मध्यमचन्द्रसाधनं चाऽह ।

ऽर्कोत्थफलोडु २७भागै-
श्चराभ्रभां२७०शैः परिसंस्कृतोऽसौ ।
इन्दुर्ध्रुवाढ्यो

अहर्गणाच् चन्द्रोच्चसाधनमाह ।

ऽथ दिनग्रहां९शो
दिनद्वितर्कां ६२शकलासमेतः॥८॥
ध्रुवान्वितः शीतरुचेर्मृदूच्चं

स्पष्टचन्द्रसाधनमाह ।

कृत्वाऽर्कवत् स्यादमृतांशुरस्मात् ।

चन्द्रस्य मान्दाङ्कानाह ।

इन्दोस्त्रिबाणा ५३ युगशून्यचन्द्राः १०४
पक्षेषुचन्द्राः १५२ शरनन्दचन्द्राः १९५ ॥९॥
दन्ताश्विनो२३२ द्व्यङ्गयमा २६२ शराष्टा-
क्षोण्य२८५ष्टगोक्षोणि२९८ गुणाभ्ररामाः३०३।

सूर्याङ्कतश्चन्द्राङ्कसाधनमाह ।

सूर्यस्य खण्डाः शरगो९५विनिघ्नाः
कुवेद४१भक्ताः शशिखण्डका वा ॥१०॥

चन्द्रसूर्ययोः स्फुटगतिसाधनमाह ।

खण्डान्तरे शेषतदन्तरघ्ना -
शां१०शोनिते विश्व१३हृतं विधोश्चेत् ।
तद्दिग् १०लवे कर्किमृगादिकेन्द्रे
युतोनिते मध्यगती स्फुटे स्तः ॥११॥

पञ्चाङ्गानयनं विवक्षुस्तदन्यतमतिथिसाधनमाह ।

सूर्योनचन्द्रार्क १२लवाद् गताः स्यु-
स्तिथ्योऽवशिष्टोनपपी१२विलिप्ताः ।
गत्यन्तराप्ता घटिकाः स्युरेष्या
वारः समाद्याढ्यगणाद्रि ७शेषात् ॥१२॥

वारप्रवेशकालसाधनमाह ।

चरार्द्ध देशान्तरयोः स्वजाता-
वैक्यं विजातौ विवरं त्वनेन ।
परिष्कृताः षष्टि६०कला दिनेश -
लिप्ताः स्वदेशे गणितागमोक्ताः ॥ १३ ॥

नक्षत्रयोगसाधनमाह ।

विधोः सार्कचन्द्रस्य लिप्ताः खखेभै ८००-
र्विभक्ता गतौ स्तो भयोगौ च शेषे ।
क्रमाद्धार८००शुद्धे खषड् ६०घ्ने स्वगत्या
जवैक्येन भक्ते तदेष्याः कलाः स्युः ॥१४॥

रत्नदीपे पञ्चाङ्गाधिकारः

ब्रह्मवसिष्ठादिसिद्धान्तोक्तानां सूक्ष्मनक्षत्राणां स्थूलनक्षत्रतः साधनमाह ।

अश्वादितो बाण५गुणा भसङ्ख्याः
शैलै७र्विभक्ता ऋणलिप्तिकाः स्युः ।
तीक्ष्णोग्रत्राष्ट्वग्निजलेशभानां
त्र्यंशोनशून्याग्नि२९।४० कला ऋणाख्याः ।।१५।।
नन्देन्दु१९लिप्ता गजभू१८विलिप्ताः
कर्णादिषण्णां कथिता धनाख्याः ।
धनर्णयोरन्तरमन्यथैक्यं
कृत्वाऽश्विभादेर्ध्रुवलिप्तिकाः स्युः ।।१६।।
विश्वान्त्यतोऽङ्केन्दु१९कलाऽभिजित् स्याद्
भमाननिघ्नाः खरसै६०र्विभक्ताः ।
ताभिर्भघट्यः परिसंस्कृताः स्युः
सूक्ष्मर्क्षलिप्ता व्यवहारसिद्ध्यै ।।१७।।

करणसाधनमाह ।

गततिथिर्द्वि२गुणा मुनि७शेषिता
करणमग्र्यदलेऽथ परे दले ।
कु१युगश्चाऽसितभूतपरार्द्धतः
शकुनितः स्थिरकर्णचतुष्टयम् ।।१८।।

तिथिचयापचयार्द्धयुगूनिता

गगनराम३०कलाः करणप्रमा ।

पञ्चाङ्गसाधनस्योपसंहारमाह ।

गणक साधय सत्फलदं नृणां

प्रतिदिनं समयाङ्गमितीरितम् ।।१९।।

तिथ्यन्तादिस्फुटीकरणमाह ।

तत्कालजार्केन्दुत एव तेषां

स्फुटत्वमस्मादधिकेऽल्पके वा ।

ततोऽसकृत् साधनतः स्फुटत्वं

कार्यं त्वदृष्टागमहेतुर्विद्भिः ।।२०।।

इति दैवज्ञशिरोमणिना लक्ष्मीपतिशर्मणा विरचिते सिद्धान्तसारे रत्नदीपे पञ्चाङ्गाधिकारः

अथ रत्नदीपे पञ्चताराग्रहाधिकारः ।।

अहर्गणाद् भौमसाधनमाह ।

शिव११घ्नघस्रैकयमां२१शकोऽह्नः

शून्येभ८०भागैः सकलः कुजः स्यात् ।

अहर्गणाद् बुधशीघ्रोच्चसाधनमाह ।

शराब्धि४५निघ्नद्युगणेश११भक्तो

दिनेश११भागैः सकलो बुधोच्चम् ।।१।।

अहर्गणाद् बृहस्पतिसाधनमाह ।

गणार्क१२भागो द्युखखाब्धिवेदां४२००-
शोनो गुरुः स्याद्

अहर्गणाच् शुक्रशीघ्रोच्चसाधनमाह ।

अथ शुक्रशीघ्रम् ।

दिनाष्ट८निघ्नाच् छर५भक्तलब्धं
दिनाभ्रतर्काब्धि४६०लवाभ्युपेतम् ।।२।।

अहर्गणाच् शनैश्चरसाधनमाह ।

अहर्गणः सप्त७गुणो नवाभ्र-
पक्षै२०९र्विभक्तोऽरुणपुत्रमध्यः ।

अहर्गणस्य सापेक्षत्वात् तदुद्भूतग्रहे ध्रुवयोगमाह ।

दिनोद्भवास्ते गगनेचरांशा
मध्या भवेयुर्ध्रुवकाभ्युपेताः ।।३।।

यथा बुधशुक्रयोः शीघ्रोच्चं तथा कुजादीनां कुतो न, यथा कुजादीनां मध्यास्तथा बुधशुक्रयोः कुतो नेति शङ्कां परिहरन्नाह ।

तुङ्गं भवेज् जीवकुजार्कजानां
ज्ञशुक्रयोर्मध्यम एव भास्वान्[1] ।

१, भास्वत् इति मूलपाठः ।

शीघ्रफलसाधनार्थं शीघ्रकेन्द्रसाधनमाह ।

ग्रहोनतुङ्गं किल शीघ्रकेन्द्रं
भार्द्धा१८०धिकं तद् यदि[2] चक्र३६०शुद्धम्॥४॥

१५० अंशाधिकेषु शीघ्रकेन्द्रांशेषु विशेषमाह ।

खबाणचन्द्रा१५०भ्यधिकं त्रि३निघ्नं
तद्युक् तदंशांश३०वशात्

शीघ्राङ्कानामुपक्रममाह ।

क्रमेण ।

भौमादिकानां चलखण्डभागाः
प्रोक्ताः सुखेन ग्रहसिद्धिलब्ध्यै ॥५॥

भौमस्य शीघ्राङ्कानाह ।

भौमस्य खागा७० गजरामचन्द्राः१३८
सप्ताङ्कचन्द्रा१९७ नगरामपक्षाः२३७ ।
नन्देन्दुपक्षा२१९ नवशैलचन्द्रा१७९
बाणाभ्रचन्द्राः१०५ स्युरिमे क्रमेण ॥६॥

बुधस्य शीघ्राङ्कानाह ।

ज्ञस्येभवेदाः४८ खखगाः९० खसूर्या१२०
भेलाः१२७ कुनन्दा९१स्त्रिरसाः६३ सुराः३३ स्युः।

२, चेद्यदि इति मूलपाठः।

बृहस्पतेः शीघ्राङ्कानाह ।

गुरोः खरामा ३० युगपञ्च५४ नागा-
ङ्गानी६८षुतर्काः६५
कुयुगा४१ भ२७मिन्द्राः१४ ।।७।।

शुक्रस्य शीघ्राङ्कानाह ।

भृगोः शरागा ७५ गजवेदचन्द्रा१४८-
स्तिथ्यश्विनो२१५ऽगाङ्गयमाः२६७ क्रमात् स्युः ।
पञ्चाङ्गपक्षा२६५ यमचन्द्रपक्षा२१२
रामोदधीला१४३ गणितागमोत्थाः ।।८।।

शनैश्चरस्य शीघ्राङ्कानाह ।

घना१७ रदा ३२ नागगुणाः३८ शनेः स्यु-
र्बाणाग्नयो३५ भानि २७ दिनानि१५ सप्त७।

शीघ्रकेन्द्राच् शीघ्राङ्कसाधनमाह ।

एष्यान्तरघ्नोर्वरितांश३०भागा-
न्वितोनितास्ते स्फुटशीघ्रजाङ्काः ।।९।।

ग्रहे फलसंस्कारमाह ।

भवन्ति ते तर्क६हृताश्चलांशा-
स्तदर्द्धयुक्तोनितमध्यखेटः ।
प्राग्द्राग्ग्रहो मन्दखगः समग्रै-
श्चलांशकैर्युग् रहितः स्फुटः स्यात् ।।१०।।

मन्दफलसाधनार्थं स्थिरमन्दोच्चांशान् मन्दकेन्द्रसाधनं चाऽह ।

द्विरामचन्द्रैः१३२ शरपक्षदस्त्रै २२५-
यमाद्रिचन्द्रैः१७२ कुगजैः८१र्मृदूच्चैः ।
नागाग्निदस्त्रैः२३८ कुसुताद् विशुद्धाः
प्राग्द्राग्ग्रहाः स्युर्मृदुकेन्द्रकानि ॥११॥

मन्दफलसाधनमाह ।

मान्दं केन्द्रं भार्द्ध१८०भागाधिकं चेच्-
छुद्धं चक्रै३६०स्तत् खरामांशकैः३० स्युः ।
खेलाः१० शैलेला१७ नखाः२० कुञ्जरेला१८
भीमा११ भोग्यान्तर्हतात् खाग्नि३०भागैः ॥१२॥

युक्तोनाऽऽप्ते वेदरामै३४र्गुणैकै१३-
र्बाणेलाभिः१५ पञ्चभि५स्त्र्यश्विभि२३र्घ्नाः ।
भौमादीनां षष्टि६०हृन्मन्दभागा
मध्यस्तत्संस्कारितो मन्दखेटः ॥१३॥

एवं स्पष्टग्रहसाधनं कृत्वा स्पष्टगतिसाधनं विवक्षुर्मन्दस्फुट-गतिसाधनं शीघ्रकेन्द्रगतिसाधनं चाऽह ।

अर्द्धा$\frac{1}{2}$र्द्धा$\frac{1}{2}$भ्रार्कांश$\frac{1}{१}$ पञ्चांश$\frac{1}{५}$षष्टच-
शै$\frac{1}{६}$॰र्मान्दाङ्कान्तः फलैर्हीनयुक्ता ।
भौमान् मध्या मन्दजा मन्दहीना
तुङ्गा केन्द्रा स्याद् गतिः शास्त्ररीत्या ॥१४॥

स्पष्टगतिसाधनमाह ।

खण्डान्तरं शेषतदन्तरघ्ना-
ऽभ्रद्वयं३०शहीनान्वितमेव तेन ।
केन्द्रा हता शून्यगजेन्दु१८०भक्तै-
र्युतोनिता मन्दगतिः स्फुटा स्यात् ॥१५॥

शीघ्रकेन्द्रांशवशात् ताराग्रहाणामुदयं वक्रतां चाऽह ।

भ२७तान४९शक्रो१४त्कृति२३मेघ१७सङ्ख्यैः
किलोदयं वेदनृपै१६४र्युगेन्द्रैः१४४ ।
बाणारुणै१२५र्बाणनृपैः१६५ शरेशैः११५-
र्वक्रं कुजाच्च्छीघ्रलवैः प्रयान्ति ॥१६॥

वक्रयोर्बुधशुक्रयोः पूर्वस्यामुदयो भवति, तात्कालिकाञ्
शीघ्रकेन्द्रांशानाह ।

वक्रज्ञशुक्रौ त्रिनखै२०३स्त्रिनाग-
चन्द्रै१८३र्भजेता[3] मुदयं तदंशैः ।

अस्तमयस्य वक्रत्वत्यागस्य च शीघ्रकेन्द्रांशानां साधनमाह ।

अस्तं च मार्गं च भचक्र३६०शुद्धैः

पूर्वोदयस्य पश्चिमोदयस्य च व्यवस्थामाह ।

मन्दा रवेः प्रागुदयं परेऽन्ये[4] ॥१७॥

---

३. भवेताम् इति मूलपाठः ।

४. परेऽन्यत् इति मूलपाठः।

उदयादिषु दिनज्ञानमाह ।

खांशैः३०० शरागै७५स्त्रिशतै३००र्नखेन्दुभि१२० -
भौमस्य, दन्तै३२स्त्रियमै२३ रदै ३२ रदैः ३२ ।
बुधस्य, जीवस्य तु वारणारुणैः१२८
खार्कै१२०र्गजाक्षीन्दुभि१२८रम्बराग्निभिः३०॥१८॥

शुक्रस्य बाणाग्नियमै२३५र्द्विबाणैः५२
पञ्चाग्निपक्षै२३५र्वसुसप्तभि७८श्च ।
शने रसाभ्रेन्दुभि१०६रक्षविश्वै१३५-
र्बाणाभ्रचन्द्रै१०५र्गजराम३८घस्त्रैः ॥१९॥

उदयात् कुटिलैस्ततोऽथ मार्गै[५]-
स्तस्मादस्तमतः प्रकाशता[६] ।
कुसुतादिषु संभवन्ति घस्त्रै-
रिति सच्छात्रसुखाय दर्शितोऽत्र ॥२०॥

एवं साधारणमुक्त्वा बुधशुक्रयोर्विशेषमाह ।

युगै४र्जिनै२४र्वक्रगयोरदृश्यता
ततो नृपै१६र्नागा८दिनैर्ज्ञशुक्रयोः ।
दृश्यत्वमस्माद् ऋजुता युगै४र्दिनैः
सिद्धै२४र्भवेतामनुमानमेतत् ॥२१॥

---

५ कुटिलं ततो ऽथ मार्गं इति मूलपाठः ।

६. प्रकाशतां इति मूलपाठः ।

अगस्त्योदयास्तकालिकस्वदेशजार्कसाधनमाह ।

पलप्रभा स्वार्द्धयुतेषु ७।३० निघ्ना
तद्युक् खनन्द ९० प्रमसूर्यभागैः ।
किलोदयं तद्रहिताष्टतर्क ६८ -
प्रमार्कभागैर्घटजोऽस्तमेति ।।२२।।

राहुसाधनमाह ।

दिननवकु १९ लवैर्दिनस्य बाण-
श्रुति ४५ फलसम्मितदण्डकैर्विहीनः ।
ध्रुवक इह भवेद् विलोमगत्या
प्रतिदिनमेव शशाङ्कपातखेटः ।।२३ ।।

ग्रहाणां नक्षत्रचरणप्रवेशकालस्य साधनमाह ।

भचरणाधिकहीनखगः कली-
कृत इति प्रहृतस्तदयुग्युतः ।
अवधिकाल उडुप्रगतो भवेद्
ऋजुगतावनृजौ तु विपर्ययः ।।२४।।

इति दैवज्ञशिरोमणिना लक्ष्मीपतिशर्मणा विरचिते
सिद्धान्तसारे रत्नदीपे पञ्चताराग्रहाधिकारः

अथ रत्नदीपे त्रिप्रश्नाधिकारः

लग्नोपयोगितया लङ्कोदयान् स्वदेशोदयाँश्चाऽह ।

मातङ्गभानि २७८ नवनन्दयमा २९९ स्त्रिदन्ता ३२३
लङ्कोदया विकलिकाः क्रमगोत्क्रमस्थाः ।
हीनान्विताश्चरपलैरजतः स्वदेशे
तद्व्यत्ययाद् धटभतः क्रमगोत्क्रमस्थैः ॥१॥

लग्नसाधनमाह ।

तत्कालजार्कोऽयनयुक् तदीय-
भोग्यांशकघ्नोदयखाग्नि ३०भागः ।
भोग्यो रवेस्तद्रहितान्निजेष्टाद्
वेश्यादिलग्नानि विशोध्य शेषम् ॥२॥
अशुद्धहृत् खाग्नि ३० हतं लवाद्यं
गतर्क्षयुक् स्याद् व्ययनं विलग्नम् ।

भोग्यकालादिष्टकालेऽल्पे लग्नसाधने विशेषमाह ।

भोग्याल्प इष्टेंऽश ३० गुणं स्वभाप्तं
तेनाऽन्वितोऽर्को भवतीह लग्नम् ॥३॥

लग्नात् कालसाधनमाह ।

रविभोग्योदयभुक्तयुक् तदन्त -
र्गतलग्नप्रमयुग् निजेष्टकालः ।

सूर्यलग्नयो राश्यैक्ये कालसाधनमाह ।

रविलग्नैकभगे तदन्तरांशा-
हृतलग्नप्रमखाग्नि३० भाग इष्टम् ।।४।।

रात्रिगतघटिकाभिर्लग्नसाधने विशेषमाह ।

साङ्गा६र्कतोऽस्ताद् गतलिप्तिकाभिः
कार्यं विलग्नं निशि वा सुखार्थम् ।

दशमलग्नस्य चतुर्थलग्नस्य च साधनमाह ।

लङ्कोदयैर्लग्नवदेव साध्ये
नतोन्नताभ्यां दशमा १०म्बु ४ लग्ने ।।५।।

ससन्धिभावसाधनमाह ।

साङ्ग६र्क्षलग्ना १ भ्र १० गृहे कलत्र ७-
तुर्ये[७] ४ सुखात् ४ सप्तमतो ७ भ्र१०भावात् ।
लग्नाद् १ विलग्नं १ सुखभं ४ कलत्रं ७
मध्यं १० विशोध्याऽग्नि३ हृतानि तैः स्युः ।।६।।

---

७. गृहेऽस्ततूर्ये भावे इति मूलपाठः ।

युक्तानि केन्द्राणि १।४।७।१० पणा २।५।८।११ न्यथापो
क्लिमानि ३।६।९।१२ सन्धिर्विवरं तयोर्यत् ।
इतीह भावानयनं पुराणै-
रुक्तं मयोक्तं व्यवहारसिद्धयै ॥७॥

उत्तरदक्षिणगोलयो: परिभाषां तथा दिनमानस्य रात्रिमानस्य च साधनमाह ।

स्यातामजादिषु घटादिषु सौम्ययाम्यौ
गोलौ तयोश्चरदले तिथि १५ युक्तहीने ।
अह्नोर्दले खगुण ३० त: पतिते निशार्द्धे[८]
द्वि २ घ्ने च ते निगदिते दिनरात्रिमाने ॥८॥

अक्षकर्णस्य साधनमाह ।

भाकोटि १२ वर्गैक्यपदं श्रुतिर्

अक्षांशानां साधनमाह ।

दिक् १० -
छिद्भान्विताश्चन्द्रयुगा ४१ रसा ६ प्ता: ।
कर्णान्वितास्तैर्विहृता: खनन्दा ९०-
हता विभा साऽक्षलवा अवाच्या: ॥९॥

---

८. तेहर्दलेंशपतिते भवतो निशार्द्धे इति मूलपाठ: ।

क्रान्त्यङ्कानाह ।

समुद्रा गुणै ४।३ रष्टसङ्ख्या ८ विपादा –
रुणा ११।४५ दन्तिभिः पञ्चचन्द्राः१५।८ खचन्द्रैः।
गजेला १८।१० नखाः षड्गुणै २०।३६भैस्तु जात्योर२।२७–
ऽद्रिरामैस्त्रिपक्षा२३।३७जिनाः२४ क्रान्तिभागाः।।१०।।

क्रान्तिसाधनमाह ।

सायनार्कभुजदिग् १० लवजाः स्युः
क्रान्तयोऽप्यथ तदन्तरनिघ्नात् ।
शेषतो दश१०लवेन समेताः[९]
क्रान्तयः स्फुटतराः स्वदिशि स्युः ।।११।।

क्रान्तिसाधने प्रकारान्तरमाह ।

भुजोननिघ्नाः खगजेन्दव १८० स्त –
न्नगाश्व ७७ भागोन–गुणाब्धिवेदैः ।
कलाष्टभूनै ४४२।४२र्विहृतास्तु ते स्यात्
क्रान्तिर्लवादिर्यदि वा सुखार्थम् ।।१२।।

नतकालस्योन्नतकालस्य च साधनमाह ।

दिनार्द्धेष्टान्तरं प्रोक्तं नतं तत् त्रिशतो३०ऽधिकम्[१०] ।
षष्टि६०शुद्धं च तत् त्रिंश३०च्छुद्धं ज्ञेयं समुन्नतम्।।१३।।

---

९. संयुताः इति मूलपाठः ।
१०. त्रिशतोऽधिके इति मूलपाठः ।

छायाकर्णज्ञानार्थं हारसाधनमाह ।

द्विधा नतकृतिः खखाङ्क९००युतया खपञ्चा ५०हता

हृता[11] च रहितं शरै ५ र्दिनदलं हरः स्याद्

पञ्चदश१५भ्यो घटीभ्योऽधिके नतकाले

हारसाधने विशेषमाह ।

यदा

नतं शरकु१५तोधिकं दिनदलान्नतं पातये-

दभीष्टनतकालजः स्फुटहरोऽतिसूक्ष्मश्रमात् ॥१४॥

भाज्यसाधनमाह ।

चरं प्रथमखण्डहृद् दलितमात्मनिघ्नं स्वषड् ६-

लवेन रहितं दशा१०भ्यधिकमक्षकर्णाहतम् ।

भवेद् हृति-

छायाकर्णस्य च्छायायाश्च साधनमाह ।

रतो हराप्तफलमत्र कर्णाङ्गुलं

पपी १२ कृतिविहीनिताच्छ्रवणवर्गतो भा पदम्॥१५॥

छायातश्छायाकर्णस्य नतकालस्य च साधनमाह ।

शङ्कु १२ विभावशतः श्रवणं तद् -

भक्तहृतिस्तु हरः शर ५ युक्तः ।

---

११. हृदा इति मूलपाठः ।

द्य्वर्द्धविशुद्धमिदं पृथगभ्रा –
भ्राङ्क ९०० हतात् खशरा ५०त् पतितेन ॥१६॥
लब्धफलस्य पदं नतमद्धा

शेषे दशाधिके सति हर एवोन्नतकालो भवति, अर्द्धदिनस्य मानमुन्नतकालेन रहितं नतकालो भवतीति चाऽह ।

पङ्क्त्य१०धिके हर एव स विद्धि ।
उन्नतमेव नतं दिवसार्द्धे-
नाऽन्तरितं लघुकर्म सुसिद्धम् ॥१७॥

सप्ताङ्गुलशङ्कुच्छायातो दिनगतशेषघटीसाधनमाह ।

तिथि१५तोऽन्तरतोऽधिके दिनार्द्धे
दश१०निघ्नः स्वर७हृद्दृणं, तद्रूने ।
नव९निघ्नयुगा४प्तयुग् नृभा स्याद्
विषुवन्मध्यदिनोत्थनृप्रभायाम् ॥१८॥
दिवसार्द्धविभोनितेष्टभाऽगा७-
न्वितयाप्तोऽग७गुणो दिनार्द्धकालः ।
गतगम्यकला मता नग७ घ्ना[१२]
रवि१२हृत् सा पलभा नरप्रभा स्यात् ॥१९॥

---

१२. गतगम्यकले स्त अभ्रनिघ्ना इति मूलपाठः ।

मध्याह्ने सूर्यस्य नतांशानामुन्नतांशानां च साधनमाह।

अक्षांशापमलवसंस्कृतिर्नतांशा
मध्याह्ने नवति९० विशोधितोन्नतांशाः ।

तुरीययन्त्रेण सूर्यस्योन्नतांशान् ज्ञात्वा दिनगतशेष-
घटीनां साधनमाह ।

यन्त्रोत्थोन्नतगुणितं दिनार्द्धमानं
मध्याह्नोन्नतलवहृद् गतैष्यलिप्ताः ।।२०।।

दिनगतशेषघटीभ्यो यन्त्रोन्नतांशानां साधनमाह ।

गतैष्यघट्या गुणिता दिनार्द्धो-
न्नतांशका घस्रदलेन भक्ताः ।
तत्कालजा उन्नतभागकाः स्यु-
स्तुरीययन्त्राद्यवलोकनाय ।।२१।।

यन्त्रेणोन्नतांशान् ज्ञात्वा छायाकर्णस्य साधनमाह ।

यन्त्रोन्नतांशापमकेन भक्ता
नागेभपक्षा २८८ भवतीह कर्णः ।

छायाकर्णतो यन्त्रोन्नतांशानां साधनमाह ।

कर्णेन वाऽष्टाष्टयमा२८८विभक्ता-
स्तस्माद् विशोध्याऽपमकस्य सङ्ख्या ।।२२।।

दिग्१०घ्नावशेषैष्यहृताप्तयुक्ता
दिग्१०घ्नेष्टका उन्नतभागकाः स्युः ।

मध्याह्नकालोपलब्धेभ्यः सूर्यनतांशेभ्यः सूर्यक्रान्तेर्ज्ञानं क्रान्तेः सायनसूर्यभुजांशानां ज्ञानं चाऽह ।

नत्यक्षयोरन्तरगोऽपमोऽस्माद्
विलोमतः सायनभानुबाहुः[13] ।।२३।।

रात्रौ खमध्यसमीपगतनक्षत्रदर्शनेन लग्नज्ञानमाह ।

खमध्यगाऽर्वादिभतोऽङ्गभागा
वेदाभ्रचन्द्रा १०४ (अश्विन्यः)
युगभूमिचन्द्राः ११४ (भरण्यः) ।
नवद्विचन्द्रा१२९ (कृत्तिकाः)
वियदब्धिचन्द्रा १४० (रोहिण्यः)
गुणेषुचन्द्रा १५३ (मृगशीर्षम्)
नगबाणचन्द्राः १५७ (आर्द्रा) ।।२४।।
अथादितेर्बाहुभुजङ्गसोमा[14] १८२ (पुनर्वसू)
वेदाङ्कसोमा १९४ (तिष्यः)
रसनन्दसोमाः १९६ (अश्लेषाः)।

१३. वैलोमतः सायनबाहुभानुः इति मूलपाठः ।
१४. अथोदितेर्बाहुमतंगसोमा इति मूलपाठः ।

गुणेन्दुपक्षा २१३ (मघाः)
रसनेत्रपक्षा २२६ (पूर्वफल्गुन्यौ)
वेदाग्निपक्षा २३४ (उत्तरफल्गुन्यौ)
नगवेदपक्षाः २४७ (हस्तः) ॥२५॥
चित्रोडुतोऽङ्गेषुयमा२५६ (चित्रा)-
स्त्रिभानी २७३ (स्वातिः)-
र्भेभाश्विनो २८८ (विशाखे)
नेत्रविरूपरामाः ३०२ (अनुराधाः)।
नागाभ्ररामा ३०८ (ज्येष्ठाः)
रसपक्षरामा ३२६ (मूलम्)
बाणाब्धिरामाः ३४५ (पूर्वाषाढे)
शरबाणरामाः ३५५ (उत्तराषाढे) ॥२६॥
तथाऽभिजिद्ध्रादिषवो ५ (अभिजितः)-
ऽग्निपक्षाः २३ (श्रवणम्)
शराग्नयो३५ (धनिष्ठा) बाणरसाः ६५ (शतभिषजः)
खशैलाः ७० (पूर्वभद्रपदे)।
ग्रहाद्रयः ७९ (उत्तरभद्रपदे)
पर्वतखेचराः ९७ (रेवत्यः) स्यु-
र्नेपालभूपालकराजधान्याम् ॥२७॥

नलिकाबन्धन–कुण्डमण्डप–गृहनिर्माणाद्युपयोगित्वात् प्रकरणप्राप्तं दिक्साधनमाह ।

रदा३२ङ्गुलव्यासवृतिस्थकेन्द्र-
समुच्छ्रितार्का१२ङ्गुलकोटिजा भा ।
विशत्यपैतीह परा च पूर्वा
वृतावपाङ्मेरुदिशौ च ताभ्याम् ॥२८॥

छायाप्रवेशनिर्गमयोरेककालिकत्वाभावाद यदन्तरं पतति तद् वस्तुसिद्धमाह ।

कर्कादिपञ्च५र्क्षगते क्रमाद् रवौ
भू१नेत्र२नेत्रा२श्वि२हिमांशु१यूकया ।
नक्रादिपञ्च५र्क्षगते हरेदिशा
चाल्याऽऽयने स्वे हययुग्मयोर्नहि[१५] ॥२९॥

सूक्ष्मपूर्वापराभ्यां दक्षिणोत्तरदिक्साधनं विदिक्साधन चाऽह ।

एवं स्फुटप्रागपरोत्थचिह्ने[१६]
ज्ञेयौ विधिज्ञैः परपूर्वमध्यौ ।

---

१५. कर्कादिपंचादिगते क्रमाद्रवौ
भूनेत्रनेत्राश्विहिमांशुयूकया ।
मृगादिपंचादिगते हरेदिशा
चाल्या स्वगोले हययुग्मयोर्नहि ॥ इति मूलपाठः ।

१६. चिह्नयोः इति मूलपाठः ।

ताभ्यां सुभङ्ग्या रचिताण्डजाऽऽभा
याम्योत्तरा दिग् विदिशश्च ताभि: ।।३०।।

राजसभायां स्वकौशलदर्शनाय नलिकाबन्धार्थं भुजकोटि-साधनमाह ।

दृक्कर्मसंस्कृतखगादपम: स बाणै:
संस्कारित: स्फुटतरोऽपमभाग एव ।
तद्घ्नेष्टकर्ण–पलजश्रवण–घ्न–शून्या-
श्वाद्र्यं ७००शकोऽपमककुब्गतदिग्भुज: स्यात्।।३१।।
संस्कारितोऽक्षप्रभया स्फुटोऽसौ
छाया निजेष्टश्रवणात् प्रसाध्या ।
छायाकृति: स्पष्टभुजस्य वर्गो-
ऽनयोर्वियोगात् पदमत्र कोटि: ।।३२।।

ग्रहवेधार्थं भुजकोटिच्छायानां निवेशनप्रकारमाह ।

ज्ञात्वा दिश: प्रागपरे कपाले
खेटे तदास्यां विनिधाय केन्द्रात् ।
कोटिं तदग्रात् स्वदिशि न्यसेद् दो–
र्मध्ये तयोर्न्यस्य सुतिर्यगाभाम् ।।३३।।

ग्रहवेधरीतिमाह ।

छायाग्रचिह्ने विनिधाय शङ्कुं
तदग्रगे केन्द्रमुखोत्थसूत्रे ।

स्थिरीकृते वंशनले खगं खे

विलोकयेद्

जले मुकुरादौ वा ग्रहप्रतिबिम्बदर्शनार्थं नलिकास्थापनमाह ।

वा भुवि केन्द्रशङ्कोः ।।३४।।

दृगग्रलग्नां नलिकां संस्थाप्याऽऽदर्शके जले ।

दर्शयेद् वा सज्जनानां रञ्जनाय नृपस्य वा ।।३५।।

इति दैवज्ञशिरोमणिना लक्ष्मीपतिशर्मणा विरचिते सिद्धान्तसारे रत्नदीपे त्रिप्रश्नाधिकारः

अथ रत्नदीपे चन्द्रग्रहणाधिकारः

ग्रहाणां चालनमाह ।

गतैष्यनाडीघ्नजवाभ्रतर्कां ६०-

शोनाभ्युपेतः खचरः किल स्यात् ।

तत्कालजौ-

पूर्णिमान्तकालस्य लक्षणमाह ।

ऽशादिसमौ रवीन्दू

पर्वान्तकाले भवतः स्फुटौ तौ ।।१।।

ग्रहणसंभवं शरसाधनं चाऽह ।

मन्व१४ल्पाश्चेद् व्यग्विनोस्तथा भुजांशाः

सार्द्धास्ते स्यात् तद्दिगुत्थोऽङ्गुलाद्यः ।

बाणश्[17]

१७. सार्द्धास्ते स्युस्तद्दिगुत्थांगुलाद्याः बाणाश् इति मूलपाठः ।

चन्द्रस्य सूर्यस्य च बिम्बस्य साधनमाह ।

चेन्दोर्बिम्बमब्ध्यद्रि७४भक्ता
भुक्तिर्भानोश्चाऽक्षि२निघ्नेश११भक्ता ।।२।।

भूभाबिम्बसाधनमाह ।

द्विपक्ष२२भक्तेन्दुगतिर्विवस्वद्–
गत्यद्रि७भागेन कुभोनिता स्यात् ।

चन्द्रग्रहणे चन्द्रविम्बश्छाद्यो भूभाविम्बश्छादक इति सूचयन् मानैक्यखण्डस्य ग्रासस्य खग्रासस्य च साधनमाह ।

भूभेन्दुबिम्बाढ्यदलं शरोनं
छन्नं च तच् छाद्यवियुक् खरोधः ।।३।।

स्थित्यर्द्धस्य मर्दार्द्धस्य च साधनमाह ।

मानैक्यार्द्धात् सशराच् छन्ननिघ्नान्
मूलं खाङ्क९०घ्नं जवार्द्धान्तरेण ।
भक्तं लिप्तादिस्थितिः स्याच् च बिम्ब-
विश्लेषार्द्धाभ्रग्रहाभ्यां विमर्दः ।।४।।

स्पर्शमोक्षस्थित्यर्द्धयोः संमीलनोन्मीलनमर्दार्द्धयोश्च साधनमाह

बाणस्य नागाब्धि४८लवेन युक्ता
हीना स्थितिः स्पर्शविरामजे स्तः

षड्दर्क१२भादभ्यधिके विराहौ
न्यूनेऽन्यथैवं कथितौ विमर्दौ ॥५॥

स्पर्शकालस्य मोक्षकालस्य संमीलनकालस्योन्मीलनकालस्य च साधनमाह ।

ग्रहस्य मध्या घटिकाः स्थितिभ्यां
वियुग्युताः स्पर्शविरामलिप्ताः ।
मर्दोनिताढ्या ग्रहमध्यलिप्ता
निमीलनोन्मीलननाडिके स्तः ॥६॥

इति दैवज्ञशिरोमणिना लक्ष्मीपतिशर्मणा विरचिते
सिद्धान्तसारे रत्नदीपे चन्द्रग्रहणाधिकारः

अथ रत्नदीपे सूर्यग्रहणाधिकारः

दर्शान्तकालस्य लक्षणमाह ।

दर्शान्तकालेऽर्कविधू समौ स्तो
राश्यादिभिस्

दर्शान्तकालजस्य त्रिभोनलग्नस्य नतांशानामुन्नतांशानां च साधनमाह ।

तत्समयोत्थलग्नम् ।
त्रि३भोनलग्नापमसंस्कृतोऽक्षो
नतं खगो ९०भ्योऽन्तरमुन्नतं स्यात् ॥१॥

मध्यमस्य स्फुटस्य च लम्बनस्य साधनमाह ।

व्यू३नाङ्गसूर्यान्तरतोऽपमः स[१८]
षड्६द्धृतो मध्यमलम्बनं स्यात् ।
तदुन्नतक्रान्तिलवैर्विनिघ्नं[१९]
सिद्धै २४विभक्तं स्फुटलम्बनं स्यात् ॥२॥

सूर्यग्रहणे मध्यकालस्य साधनमाह ।

त्रि ३ भोनलग्ने रवितोऽणुपुष्टे
दर्शान्तलिप्ता रहिताभ्युपेता ।
तेन स्फुटा स्याद्

लम्बनसंस्कृतदर्शान्तकालिकत्रिभोनलग्नसाधनं नत्युपजीव्य-नतांशसाधनं चाऽह ।

रस६निघ्नलम्बो-
नयोजिताद् वित्रिभतो नतांशाः ॥३॥

मध्यग्रहणकालिकस्य व्यग्वर्कस्य शरस्य च साधनमाह ।

सार्द्धाब्धि ४।३०ह्रल् लम्बनमंशपूर्वं
तेनोनयुग्व्यग्विनतः शरोऽत्र ।

नतेः स्पष्टशरस्य च साधनमाह ।

नतांशजक्रान्तिलवा द्वि२निघ्ना-
स्त्र्या३प्ताः स्वभूतर्क६१लवैरुपेताः ॥४॥

---

१८. पमं तत् इति मूलपाठः ।

१९. तदुन्नतक्रान्तिलवेन निघ्नं इति मूलपाठः ।

नतांशदिग्जाऽवनतिर्भवेत् तत्-
संस्कारितः स्पष्टतरः शरः स्यात् ।

सूर्यग्रहणे सूर्यबिम्बश्छादचश्चन्द्रबिम्बश्छादक इति सूचयन् मानैक्यखण्डस्य ग्रासस्य च साधनमाह ।

अर्केन्दुमानैक्यदलं शरोनं
छन्नं दिनेशग्रहणे स्फुटं स्यात् ॥५॥

स्पर्शस्थित्यर्द्धस्य मोक्षस्थित्यर्द्धस्य संमीलनमर्दार्द्धस्योन्मीलन-मर्दार्द्धस्य च साधनं चन्द्रग्रहणोक्तरीत्या कार्यमित्याह ।

शेषं शशाङ्कग्रहणोक्तवत् स्यात्

स्पर्शकाले लम्बनं प्रसाध्य तेन स्पार्शिकेन लम्बनेन संस्कृतः स्पर्श-कालः स्फुटो भवति । एवं मोक्षसंमीलनोन्मीलनकाला अपि स्वैः स्वैर्लम्बनैः संस्करणीया इत्याह ।

स्पर्शान्त्यकाले स्फुटलम्बने च ।
तत्संस्कृतौ स्पर्शविरामकालौ
स्फुटौ भवेतां च तथा विमर्दौ ॥६॥

इति दैवज्ञशिरोमणिना लक्ष्मीपतिशर्मणा विरचिते
सिद्धान्तसारे रत्नदीपे सूर्यग्रहणाधिकारः

अथ रत्नदीपे छेदचकाधिकारः

आक्षवलनस्य दिग्ज्ञानाय नतकालस्य दिशावाह ।

दिनार्द्धतो रात्रिदलान्तमुक्तं
सौम्यं ततो यावदहर्दलान्तम् ।
याम्यं किलेन्दोर्ग्रहणे नतं स्याद्
भानोर्ग्रहे तद् विपरीतमेव ।।१।।

आयनवलनानयनमाह ।

त्रि३ भोनयुक्–सायनसूर्यदोर्भा–
दिन्द्वर्कके पर्वत ७ सूर्य १२ विश्वे १३ ।
तदन्तरघ्नांशखराम ३० भागो–
पेताः स्वदिग्जा वलनाङ्घ्रयः स्युः ।।२।।

आक्षवलनानयनमाह ।

नतं शरा ५ घ्नं भमुखं ततोऽपि
पूर्वोक्तरीत्या वलनाङ्घ्रयस्ते ।
उद्भाहताः पञ्च ५ हृतास्

स्फुटवलनाङ्घ्रिसाधनमाह ।

तयोश्च
संस्कारतः षड् ६ विहृताः स्फुटाः स्युः ।।३।।

ग्रासदिगङ्घ्रीणां साधनमाह ।

छन्नं मानैक्यार्द्धभक्तं खषड् ६० घ्नं
चौजाङ्कानां यावतां शुद्धिरत्र ।

तावद्ग्रासोत्थाङ्घ्रयोऽ-

खग्रासदिगङ्घ्रिसाधनमाह ।

थो सनेमै-

का १½ ढचः खग्रासतदुत्थाङ्घ्रयः स्युः ।।४।।

छेदचकलेखनं ग्रहमध्यस्थानस्य खग्रासस्थानस्य ज्ञान चाऽह ।

दिक्साधितायामवनाविनेन्दु-

मानार्द्धभङ्ग्या कुरु वृत्तमत्र ।

शरस्य दिक्तो वलनाङ्घ्रयः प्राग्

भिन्ने त्वभिन्ने खलु पश्चिमायाम्[20] ।।५।।

दत्त्वाऽगोस्तन्मध्यसुक्तं तदन्या-

शायां खग्रासस्य मध्यं स्फुटं स्यात् ।

स्पर्शमोक्षस्थानज्ञानमाह ।

मध्याद् ग्रासाशाङ्घ्रिभिः स्पर्शमोक्षौ

प्राक् पश्चात् स्तः शीतरश्मेः क्रमेण ।।६।।

खग्रासे संमीलनोन्मीलनस्थानज्ञानमाह ।

खग्रासाद् वै मीलनोन्मीलने स्तः

खग्रासच्छन्नाङ्घ्रिभिः प्रत्यगिन्द्रे ।

२०, पश्चिमस्यां इति मूलपाठः ।

सूर्यग्रहणे छेदचकलेखने स्पर्शमोक्षस्थानयोः संमीलनोन्मीलन-स्थानयोश्च विषये विशेषमाह ।

व्यस्तं भानोर्लेखनं

अङ्गुलाल्पो ग्रासो नाऽदेश्य इत्याह ।

चन्द्रभान्वो-

र्नाऽदेश्योऽगुश्चाऽङ्गुलाल्पः कदाचित् ॥७॥

ग्रहणे वर्णज्ञानमाह ।

अल्पो धूम्रोऽर्द्धोऽसितो वभ्रु वर्णः

पूर्णो ग्रस्तोऽब्जोऽथ मित्रस्तु कृष्णः ।

ग्रहणोत्थस्याऽशुभफलस्य शान्त्यर्थं छेदचकलेखनोपयुक्तं पत्रं तस्य दानं चाऽह ।

स्वर्णे भूर्जे वा लिखेन् मुच्यमाने

दानं कृत्वोग्रं ग्रहोत्थं विनश्येत् ॥८॥

ग्रहणे पर्वेशानयनमाह ।

अब्दस्त्रि३ष्ठोऽन्त्यं[21] भजेद् रूपरामै ३१-

र्द्विष्ठ[22] स्तेनोनस्तदष्टेन्दु१८भागैः ।

ऊर्द्ध्वो युक्तो लोचन२घ्नोऽब्धि४युक्तः

शैलै७र्भक्तः शेषतः पर्वपाः स्युः ॥९॥

---

२१. त्रिस्थोऽन्त्यं इति मूलपाठः ।

२२. द्विस्थ इति मूलपाठः ।

सप्त पर्वेशास्तेषां फलानि चाऽह ।

ब्रह्मेन्दुशक्रा धनदः प्रचेता
वह्निः परेताधिपतिः क्रमेण ।
क्षेमं शुभं भूपभयं सुभिक्षं
वृद्धिर्न सस्यं जनभीः फलानि ॥१०॥

इति दैवज्ञशिरोमणिना लक्ष्मीपतिशर्मणा विरचिते सिद्धान्तसारे रत्नदीपे छेदचकाधिकारः

अथ रत्नदीपे वर्षफलाधिकार :

संवत्सरानयनमाह ।

अब्दः पृथग् रुद्रयमै २११विनिघ्न-
श्चन्द्रागरामाशुगनेत्र२५३७१युक्तः ।
खपूर्णखाष्टादश१८०००भक्तयुक्तः
सुरेज्यमानात् प्रभवादयोऽब्दाः ॥१॥

गणितगोलतोऽनुपपन्नानामपि सिद्धान्तोक्तत्वाद् गुरूदयतः कार्तिकादिवर्षाणां ज्ञानमाह ।

ऊर्जादिमासेष्वनलाद् द्वि२भं द्वि२भं
त्र्यृ३क्षं तपस्याश्विनभाद्रमासु च ।
यस्मिन्तुडुन्यामरपूजिताङ्घ्रिक
उदेति तद्भाख्यकवत्सरो भवेत् ॥२॥

सूर्यग्रहणे छेदचकलेखने स्पर्शमोक्षस्थानयोः संमीलनोन्मीलन-स्थानयोश्च विषये विशेषमाह ।

व्यस्तं भानोर्लेखनं

अङ्गुलाल्पो ग्रासो नाऽदेश्य इत्याह ।

चन्द्रभान्वो-

र्नाऽदेश्योऽगुश्चाऽङ्गुलाल्पः कदाचित् ॥७॥

ग्रहणे वर्णज्ञानमाह ।

अल्पो धूम्रोऽर्द्धोऽसितो बभ्रुवर्णः

पूर्णो ग्रस्तोऽब्जोऽथ मित्रस्तु कृष्णः ।

ग्रहणोत्थस्याऽशुभफलस्य शान्त्यर्थं छेदचकलेखनोपयुक्तं पत्रं तस्य दानं चाऽह ।

स्वर्णे भूर्जे वा लिखेन् मुच्यमाने

दानं कृत्वोग्रं ग्रहोत्थं विनश्येत् ॥८॥

ग्रहणे पर्वेशानयनमाह ।

अब्दस्त्रि३ष्ठोऽन्त्यं[21] भजेद् रूपरामै ३१-

र्द्विष्ठ[22] स्तेनोनस्तदष्टेन्दु१८भागैः ।

ऊर्द्ध्वे युक्तो लोचन२घ्नोऽब्धि४युक्तः

शैलै७र्भक्तः शेषतः पर्वपाः स्युः ॥९॥

---

२१. त्रिस्थोत्यं इति मूलपाठः ।

२२. द्विस्थ इति मूलपाठः ।

सप्त पर्वेशांस्तेषां फलानि चाऽह ।

ब्रह्मेन्दुशक्रा धनदः प्रचेता
वह्निः परेताधिपतिः क्रमेण ।
क्षेमं शुभं भूपभयं सुभिक्षं
वृद्धिर्न सस्यं जनभीः फलानि ।।१०।।

इति दैवज्ञशिरोमणिना लक्ष्मीपतिशर्मणा विरचिते सिद्धान्तसारे रत्नदीपे छेदचकाधिकार:

अथ रत्नदीपे वर्षफलाधिकार :

संवत्सरानयनमाह ।

अब्दः पृथग् रुद्रयमै २११विनिघ्न-
श्चन्द्रागरामाशुगनेत्र२५३७१युक्तः ।
खपूर्णखाष्टादश१८०००भक्तयुक्तः
सुरेज्यमानात् प्रभवादयोऽब्दाः ।।१।।

गणितगोलतोऽनुपपन्नानामपि सिद्धान्तोक्तत्वाद् गुरूदयतः कार्तिकादिवर्षाणां ज्ञानमाह ।

ऊर्जादिमासेष्वनलाद् द्वि२भं द्वि२भं
त्र्यृ३क्षं तपस्याश्विनभाद्रमास्सु च ।
यस्मिन्नुडुन्यामरपूजिताङ्घ्रिक
उदेति तद्भाख्यकवत्सरो भवेत् ।।२।।

कर्कटसङ्क्रान्तिवाराद् मेघप्रमाणज्ञानमाह ।

दिग्१० विंशत्य२० ष्टौ८ दिनेशा१२ गजेला १८

धृत्यः १८ पञ्चा५भ्रप्रमाः कर्कवारात् ।

सूर्यादीनां ग्रहाणां वत्सराङ्कानाह ।

षट् ६ पञ्चेला १५ दन्तिनो८ऽब्दाः १७ कुनन्दाः १९

स्वर्गाः २१ शून्येला १० रवेर्वत्सराङ्काः ॥३॥

आयव्ययसाधनमाह ।

राशीशाब्देशाब्दयोगो गुण३घ्नः

पञ्चो५पेतः पञ्चचन्द्रा१५प्तशेषः ।

आयो लब्धस्त्र्या३हतः पञ्च५युक्त-

स्तिथ्यू १५नोऽन्योऽ-

वर्षेशज्ञानमाह ।

थो नृपोऽब्दादिवारः ॥४॥

वर्षे मन्त्र्यादिज्ञानमाह ।

मन्त्री मेषे कर्कटे सस्यपोऽथा-

ऽर्द्रायां मेघेशो रसेशस्तुलायाम् ।

धान्येशोऽश्वे नीरसेशो मृगास्ये

वारः प्रोक्तस्तत्फलं खेटतुल्यम् ॥५॥

अतः परं पत्रं नोपलब्धम् ।

क्वचन कोऽपि भवेद् विवेकी

विद्यामये प्रतनपूरुषजे प्रदीपे
निर्वाणतामुपगते शठवायुवेगात् ।
अन्धं तमः सकललोकमिमं निहन्या-
दित्याकुलेन मनसा नितरां बिभेमि ।।१।।

तस्यैव लोकहितकारणतां गतस्य
दीपस्य भान्तु किरणाः परितो लसन्तः ।
मा भूत् कदाचिदपि सन्तमसे निमग्ना
लोकस्थितिर्हितकरीति दृढं विचार्य ।।२।।

रात्रिन्दिवं निजसुखं गृहजं विहाय
निन्दाः खलोक्तिसुलभाश्च मया विषह्य ।
आत्मानमेव सुदृढं दधता श्रमोऽयं
सन्तन्यते, क्वचन कोऽपि भवेद् विवेकी ।।३।।

२००७।७।६

नयराजपन्तः

शुद्धिपत्रम्

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
५	१८	अहर्गणात् सूर्यसाधनमाह	अहर्गणात् सूर्यसाधनं मध्यमसूर्यसाधनं चाऽह
६	२		द्विस्थः इति मूलपाठः (टिप्पण्याम्)
७	१५	द्व्यङ्ग्यमा	द्व्यङ्ग्यमाः
७	१७	सूर्याङ्कतश्चन्द्राङ्क-साधनमाह	सूर्यमान्दाङ्कतश्चन्द्रमान्दाङ्क-साधनमाह
८	१	चन्द्रसूर्ययोः	सूर्यचन्द्रयोः
१४	१७	१ २०	१२०
१५	११	बुधशुक्रयाः	बुधशुक्रयोः
१५	१६	शुद्धैः	शुद्धै
१६	१०	कुटिलै-	कुटिल-
१७	१३	इति प्रहृत-	इतिप्रहृत-
२६	१५	धनिष्ठा	धनिष्ठाः

अस्माकं काश्चन कृतयः

१. पूर्णिमा (१–३८ अङ्काः) १३७।५०
२. अभिलेखसङ्ग्रह (१–१२भागाः) ७।५०
३. जयरत्नाकरनाटकम् ८।
४. त्रिरत्नसौन्दर्यगाथा १०।
५. ऐतिहासिकपत्रसङ्ग्रह (१ भागः) ४।५०
६. ऐतिहासिकपत्रसङ्ग्रह (२ भागः) ३।५०
७. गल्लीमा पर्याँकिएका कसिङ्गर ६।२५
८. इतिहास–संशोधनको प्रमाणप्रमेय १८।
९. श्री ५ पृथ्वीनारायण शाहको उपदेश (१–५ भागाः) ४१।
१०. गोलबोध
११. सुमतितन्त्रम् (मुद्रणालये)